संस्कृतवार्ता:

19.09.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· राष्ट्रपति-द्रौपदी-मुर्मु: प्रोक्तवती यत् गतदश-वर्षेषु स्वच्छता-अभियानम् एकं राष्ट्रव्याप्यभियानम् अभवत्।

· प्रधानमन्त्री नरेन्द्रमोदी त्रिदिवसीयायां संयुक्त-राज्य-अमेरिकादेशस्य यात्रायां मासस्यास्य एकविंशतित: त्रयोविंशति-दिनाङ्कपर्यन्तं गमिष्यति, चतुर्थे क्वाड्-सम्मेलने च भागं भजिष्यति।

· एनडीए इति राष्ट्रिय-लोकतांत्रिक-संघस्य तृतीये प्रशासने शतदिवसात्मक-शासनस्य पूर्ताविधौ केन्द्रीयकृषि-मन्त्री शिवराजसिंहचौहान: अद्य घोषितवान् यत् प्रशासनम् अग्रिममासत: आकाशवाणी-दूरदर्शनाभ्यां कृषिचौपालाख्य: कार्यक्रम: समारप्स्यति।

· अस्य वर्षस्य चाइना-ओपन-बैडमिंटन इति क्रीडा-स्पर्धायां मालविका-बंसोड इत्यनया महिला-एकल-वर्गे क्रिस्टी गिल्मर इत्येषा क्रीडिका पराजिता।

<u>राष्ट्रपति-स्वच्छताभियानम्</u>

राष्ट्रपति-द्रौपदी-मुर्मु: प्रोक्तवती यत् गतदश-वर्षेषु स्वच्छता-अभियानम् एकं राष्ट्रव्याप्यभियानम् अभवत्। राष्ट्रपति: अद्य उज्जैन-नगरे 'सफाई-मित्र-सम्मेलन' इति कार्यक्रमं सम्बोधयन्ती आसीत्। सा विषयेऽस्मिन् प्रसन्नतां प्रकटितवती यत् प्रदेशस्य अनेकानि नगराणि सफाई-मित्र सुरक्षित-नगर इति घोषितानि सन्ति।

राष्ट्रपतिवर्या उक्तवती यत् स्वच्छतया एव देश: स्वस्थ: विकसितश्च भविष्यति। राष्ट्रपति: अस्मिन् अवसरे उज्जैन-इंदौर नगरयो: मध्ये षट् पथात्मकस्य राजमार्गस्य निर्माणाय आभासीय-माध्यमेन भूमि-पूजनमपि कृतवती।

विदेशमन्त्रालय: प्रधानमंत्री अमेरिका यात्रा

प्रधानमन्त्री नरेन्द्रमोदी त्रिदिवसीयायां संयुक्त-राज्य-अमेरिकादेशस्य यात्रायां मासस्यास्य एकविंशतित: त्रयोविंशति-दिनाङ्कपर्यन्तं गमिष्यति। अद्य नवदिल्ल्यां वार्ताहरान् सूचयन् विदेशसचिव: विक्रममिस्त्री अवोचत् यत् अस्मिन् यात्रावधौ श्रीमोदी नैकेषु द्विपक्षीयेषु बहुपक्षीयेषु च विषयेषु चर्चां कुर्वन् विभिन्नै: वैदेशिकनेतृभि: हितधारकैश्च सह परामर्शं विधास्यति। तेनोक्तं यत् अवसरेऽस्मिन् श्रीमोदी कतिपयै: उद्योगिभि: सममपि मेलनं करिष्यति। श्रीमोदी एकविंशे दिनाङ्के चतुर्थे क्वाड्-सम्मेलने च भागं भजिष्यति।

शिवराज-शतदिनानि

एनडीए इति राष्ट्रिय-लोकतांत्रिक-संघस्य तृतीये प्रशासने शतदिवसात्मक-शासनस्य पूर्तावधौ केन्द्रीयकृषि-मन्त्री शिवराजसिंह चौहान: अद्य घोषितवान् यत् प्रशासनम् अग्रिममासत: आकाशवाणी-दूरदर्शनाभ्यां कृषिचौपालाख्य: कार्यक्रम: समारप्स्यति। अनेन कार्यक्रमेण शोध-प्रौद्योगिकादय: कृषिसबन्धिता: ज्ञानराशय: कृषकेभ्य: प्रदास्यन्ते। मन्त्रिणा सहैव हि निगदितं यत् राष्ट्रस्य कृषकेभ्य: कृषिकल्याणपरकानि नैकानि कार्याचरणानि अपि क्रियन्ते इति।

अवसरेऽस्मिन् केन्द्रीयगृहमन्त्रिणा अमितशाहेन शासनस्य शतदिनानां पूर्तावधौ परिवर्तनकारिणाम् उपक्रमाणां श्रृंखला उद्घाटिता।

वर्ल्ड-फुड-इण्डिया

चतुर्दिवसीय: वर्ल्डफूडइण्डिया इति विश्वखाद्यभारतमिति उत्सव: अद्यारभ्य नवदिल्ल्याम् समारब्ध:। खाद्य-प्रसंस्करण-उद्योगमन्त्रालयेन ख्यापितं यत् एतस्मिन् चतुर्दिवसीयकार्यक्रमे नवति: देशा: षड्विंशति: च राज्यानि केन्द्रशासितप्रदेशा: अष्टादश-केन्द्रीयमन्त्रालया: च भागं गृह्णन्ति। कार्यक्रमावधौ खाद्यप्रसंस्करण-क्षेत्रे नवाचारस्य प्रौद्योगिक्या: स्थिरतायाश्च प्रमुखाभिसरणं भविष्यति।

खाद्य अथ सार्वजनिक-वितरण-मन्त्री प्रह्लाद-जोशी, खाद्य-प्रसंस्करण-उद्योग-मन्त्री चिराग-पासवान: खाद्य प्रसंस्करण-राज्य-उद्योग-मन्त्री रवनीत-सिंह बिट्टु: च अस्य कार्यक्रमस्य उद्घाटन-सत्रे भागं भजितवन्त:। अस्मिन् अवसरे दृश्य-श्रव्य-सन्देश माध्यमेन प्रधानमन्त्री-नरेन्द्र-मोदी उक्तवान् यत् सर्वकार: खाद्य-क्षेत्रे नवाचार-स्थिरता-सुरक्षाभ्य: वैश्विक-मानक-स्थापनाय प्रतिबद्ध: अस्ति। श्री मोदिना प्रोक्तं यत् सर्वकार: नवोन्मेषी नीति-केन्द्रित कार्यान्वयनेन सह कृषकाणां समर्थनं करोति। अस्मिन् अवसरे भाषमाण: खाद्य-प्रसंस्करण-उद्योग मन्त्री चिराग-

पासवान: प्रोक्तवान् यत् खाद्य-प्रसंस्करण-उद्योग: भारतस्य अर्थव्यवस्थायां विकासे च महत्वपूर्णं योगदानं ददातीति।

<u>केन्द्रीयमन्त्री नितिनगडकरीः</u>

मार्गपरिवहन-राजमार्ग-मन्त्री नितिन गडकरीः अद्य अवदत् यत् हैड्रोजन् इत्यस्य उपयोगेन आगामिषु वर्षेषु प्रायः द्वादश लक्षं कोटिरूप्यकाणां जीवाश्म-इन्धनस्य आयातं प्रायः चतुर्लक्षं कोटिरूप्यकाणां यावत् न्यूनीकर्तुं सर्वकारस्य लक्ष्यम् अस्ति इति। देहलीनगरे एकस्मिन् कार्यक्रमे मन्त्री: अवदत् यत्, सर्वकारः मिराय् इति कारयानस्य परियोजनायां प्रगतिं कुर्वन् अस्ति, यत्र हैड्रोजन् इतीदं अपशिष्टेभ्यः उत्पन्नं वाष्पतत्वम् इन्धनरूपेण उपयुज्यते। सः इत्यपि अवदत् यत् जैवतन्त्रज्ञानस्य उपयोगेन हैड्रोजन् इत्यस्य उत्पादनं न्यूनमूल्येन कर्तुं शक्यते तथा च भारतं ऊर्जा-निर्यातकराष्ट्रं कर्तुं एक-डालर्-प्रति-किलोग्राम्-मूल्येन हैड्रोजन् इत्यस्य उत्पादनस्य लक्ष्यं स्वीकुर्वदस्तीति।

मन्त्रिण पुनः उक्तं यत् भारतं विश्वस्य पञ्चमं बृहत्तमं अर्थव्यवस्था भवितुं, पञ्च लक्षकोटि-अर्थव्यवस्थां प्राप्तुं च सर्वकारः कार्यं कुर्वन् अस्ति इति।

<u>पश्चिमबंगाल-जलाप्लाव:</u>

पश्चिमबंगाल प्रान्तस्य दक्षिणस्थानां जनपदानां नैकेषु स्थलेषु जलाप्लावस्य स्थिति: सञ्जाताऽस्ति। नैकेभ्य: जलबन्धेभ्य: अत्यधिकमात्रायां जलमोचनं क्रियते। येन हावड़ाया: अनेकानि क्षेत्राणि मेदिनीपुरजनपदस्य पूर्वपश्चिमभागौ, हूगली, बंकुरा, पूर्वी वर्धमानक्षेत्रम् , बीरभूम-जनपदादय: जलाप्लाविता: सन्ति। राज्य-प्रशासनं जनान् सुरक्षितस्थानं प्रति प्रापणाय सर्वविधयत्नं कुरुते। राष्ट्रिय-आपदुद्धार-बलस्य नैकानि दलानि हावडा, हूगली, पूर्व-पश्चिम-मिदनापुरजनपदेषु नियुक्तानि सन्ति। मुख्यमंत्री ममताबैनर्जी प्रभावित-क्षेत्राणां पर्यवेक्षणं ह्य: अकरोत्, उक्तवती च सा यत् जलाप्लावनमिदं प्राकृतिकं नास्ति, सा दामोदर वेली कारपोशन इत्यस्य भर्त्सना च कृतवती।

## जम्मू-कश्मीर

ह्य: प्रथम-चरणीय-मतदानानन्तरं जम्मू-कश्मीरे द्वितीय-चरणीय विधानसभानिर्वाचनस्य प्रचाराभियानं द्रुततां भजते। अद्य अपराह्णे श्रीनगरे प्रधानमन्त्री नरेन्द्रमोदी निर्वाचनसभां सम्बोधितवान्। स: अवदत् यत् अद्य जम्मू-कश्मीरस्य जना: भारतस्य लोकतन्त्रं कथं सदृढं कुर्वन्तीति विश्व: पश्यति। केन्द्र-शासित-प्रदेशस्य जनेभ्य: ह्य: प्रथम-चरणीय मतदाने सोत्साहं भागग्रहणाय प्रधानमन्त्रिणा वर्धापनानि वितरितानि। विधानसभा-निर्वाचनस्य प्रथम-चरणे प्रायश: एकषष्टी: प्रतिशतं यावत् मतदानं समनुष्ठितमासीत्।

## नेपाल-संविधानदिवस:

अद्य नेपालदेश: सम्विधान दिवसं परिपालयति । उत्सवस्य आयोजनं काठमाण्डू-नगरस्य तुण्डीखेल इति क्षेत्रे भवति। यत्र नेपालदेशस्य राष्ट्रपति:, उपराष्ट्रपति:, प्रधानमन्त्री, अन्ये च गणमान्यजना: उपस्थिता: आसन्। अवसरेऽस्मिन् राष्ट्रपति: रामचरणपौडेल: उक्तवान् यत् नेपालदेशस्य संविधानेन जातीयदृष्ट्या, धार्मिकदृष्ट्या, सांस्कृतिक-भौगोलिक-दृष्ट्या च विविधप्रकारकं नेपाली-समाजं व्यापक-राष्ट्रिय-एकताया: सूत्रे अनुस्यूतमस्ति। सहैव हि केन्द्रीकृतेन एकात्मकशासनप्रणाल्या च सर्वविध-भेदभावना: उत्पीडनानि च शमितानि सन्ति। नेपालस्य प्रधानमन्त्री कृष्णप्रसादशर्मा ओली उक्तवान् यत् संविधानेन सुनिश्चित स्वतन्त्रताया: उपयोगेन च नेपालस्य भविष्यं सुरक्षितव्यमिति।

## बैडमिन्टन

अस्य वर्षस्य चाइना-ओपन-बैडमिंटन इति क्रीडा-स्पर्धा मालविका-बंसोड इत्यनया भारतीय क्रीडिकया महिला-एकल-वर्गे विश्वस्य शीर्षक्रमे-पञ्चविंशति स्थानधात्री क्रीडीका स्कॉटलैण्ड-देशस्य क्रिस्टी गिल्मर इत्येषा पराजिता। सा गिल्मर इत्येतां पराभूय प्रागुपान्तचक्रं प्रविष्टा।

।। इति वार्ता:।।